संस्कृत-वार्ता:

10.06.2024

सायम् - 06:20

## मुख्यवार्ता:

- प्रधानमन्त्रिणा नरेन्द्र-मोदिना तृतीयवारं प्रधानमन्त्रि-पदभार-ग्रहणानन्तरम् एव अद्य कृषक-सम्मान-निधेः सप्तदश तम-भागराशिः हस्तान्तरितः।
- सिक्किम क्रांतिकारी मोर्चा इत्येतस्य नेता प्रेम-सिंह-तमाङ्गः अद्य सिक्किमस्य मुख्यमन्त्रित्वेन शपथ-वचनं स्वीकृतवान्।
- निर्वाचनायोगेन सप्त-राज्यानां त्रयोदश विधान-सभासनेषु समायोक्ष्यमाणस्य उपनिर्वाचनस्य कार्यक्रमः उद्घोषितः।
- जम्मू-कश्मीरस्य राययीजनपदे सुरक्षाबलैः आतङ्किनाम् अन्वेषणाय सघनमन्वीक्षणम् आरब्धम्, राज्यपालेन च मृतकपरिवारेभ्यः साहाय्यराशिः उद्घोषितः ।
- ऋतुविज्ञानविभागेन अद्य गोवा,महाराष्ट्र-कर्णाटक-राज्येषु तीव्रातितीव्र-वृष्टेः अनुमानं व्यक्तीकृतम्

## प्रधानमन्त्री कृषकसम्माननिधिः

प्रधानमन्त्रिणा नरेन्द्र-मोदिना तृतीयवारं प्रधानमन्त्रि-पदभार-ग्रहणानन्तरम् एव अद्य कृषक-सम्मान-निधेः सप्तदश तम-भागराशिः हस्तान्तरितः। अनेन हस्तान्तरणेन त्रिंशत् लक्षाधिक-नवकोटि-कृषकेभ्यः विंशति-सहस्र-कोटि-रूप्यकाणां लाभो भविष्यति । श्रीमता मोदिना उक्तं यत् तदीय-प्रशासनस्य प्रथमो निर्णयः कृषकक-कल्याणं प्रति तदीयां प्रतिबद्धतां द्योतयति। प्रधानमन्त्री अवदत् यत् आगामि-दिनेषु तदीयं प्रशासनं कृषि- क्षेत्राय कृषक-कल्याणाय च प्रतिबद्धतया कार्यं करिष्यति।

## सिक्किम-शपथग्रहणम्

सिक्किम-क्रांतिकारी-मोर्चा इत्येतस्य नेता प्रेम-सिंह-तमाङ्गः अद्य सिक्किमस्य मुख्यमन्त्रित्वेन शपथ-वचनं स्वीकृतवान्। शपथ-ग्रहण-समारोहः गङ्गटोक-नगरसस्य पलजोर-क्रीडाङ्गणे अभवत्। प्रेमसिंह-तमाङ्गः द्वितीय-वारं मुख्यमन्त्रि-पदस्य शपथं स्वीकृतवान् सिक्किमस्य राज्यपालः लक्ष्मण-प्रसाद आचार्यः तस्मै शपथं विज्ञापयत् । सिक्किम-मन्त्रिमण्डले एकादशमन्त्रिणः सम्मिलिताः सन्ति । प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रेमसिंहतमाङ्गाय शुभकामनापुरस्सरं राज्यस्य विकासाय उन्नतये च सफलप्रशासनस्य कामना अपि कृता ।

## उपनिर्वाचनम्

निर्वाचनायोगेन सप्त-राज्यानां त्रयोदश विधान-सभासनेषु समायोक्ष्यमाणस्य उपनिर्वाचनस्य कार्यक्रमः उद्घोषितः। एतेषु चत्वारि विधानसभा-क्षेत्राणि पश्चिम- बङ्गाले, त्रीणि हिमाचल-प्रदेशे, द्वे उत्तराखण्डे, एकैकं च बिहार-तमिलनाडु-मध्य-प्रदेश-पञ्जाब-राज्येषु विद्यन्ते। निर्वाचनायोगेन उक्तं यत् एतेषु विधानसभा-क्षेत्रेषु मतदानं जुलाई मासस्य दशमे दिने भविष्यति मतगणना च तदनु जुलाई मासस्य त्रयोदशे दिने भविष्यति।

## जम्मू-आक्रमणम्

राष्ट्रियान्वीक्षणाभिकरणस्य एकं दलं जम्मू-कश्मीरस्य रियासी-जनपदम् उपगम् । इदं राष्ट्रियं दलं स्थानीय-आरक्षिबलेन सह अन्वीक्षणं विधास्यति। अवधेयं यत् रविवासरे दुरापादिते आतङ्क्याक्रमणे दश श्रद्धालव: मृत्युमुपगता:। जम्मू-कश्मीरस्य राज्यपाल: मनोज-सिन्हा इदम् आक्रमणं क्षेत्रे अशान्ते: प्रयासत्वेन प्रतिपादितवान्। चिकित्सालये व्रणितेभ्य: मेलनस्य अनन्तरम् अमुना प्रत्येकं मृतकस्य परिजनेभ्य: दशलक्ष-रूप्यकाणां प्रत्येकं व्रणितेभ्य: च पञ्चाशत्-सहस्र रूप्यकाणाम् अनुग्रह-राशे: घोषणा कृता। अत्रान्तरे सुरक्षाबलै: आतङ्किनाम् अन्वेषणाय सघनमन्वीक्षणम् आरब्धम् ।

## प्रधानमन्त्री-विश्वनेता

प्रधानमन्त्री नरेंद्रमोदी प्रोक्तवान् यत् भारतं तृतीय-कार्यकालावधौ क्षेत्रस्य शांति-प्रगति-समृद्धिभ्यः निरन्तरकार्यं करिष्यति । अवधेयं यत् श्रीमोदी स्वकीयस्य शपथ-ग्रहण-समारोहस्य अनन्तरं ह्यः रात्रौ राष्ट्रपतिभवने भारतस्य प्रतिवेशिदेशानां, हिंद-महासागर-क्षेत्रस्य च नेतृभिः सह मेलनम् अकरोत् । अस्मिन् अवसरे प्रधानमन्त्रिणा तेभ्यः धन्यवादः प्रयच्छता, **'प्रतिवेशिप्रथमः'** **'सागर-दृष्टिकोणः'** इति नीतिद्वयम् अभिलक्ष्य भारतस्य प्रतिबद्धता पुष्टीकृता । श्रीमोदी अकथयत् यत् , भारतं अन्तराष्ट्रिय-क्षेत्रे वैश्विक-दक्षिणक्षेत्रस्य च ध्वनिं सबलं करिष्यति । श्री-मोदिना ह्यः सायं तृतीयवारं प्रधानमन्त्रिपदाय शपथवचनं स्वीकृतम् । राष्ट्रपति-द्रौपदीमुर्मूवर्या राष्ट्रपतिभवने आयोजिते एकस्मिन् समारोहे नवीन-मंत्रिपरिषदः सदस्यैः सह श्रीमोदिने पदस्य गोपनीयतायाः च शपथवचनं ग्राहयितवती । शपथ-ग्रहण-समारोहावधौ केन्द्रियमन्त्रिमण्डलस्य त्रिंशत्-मन्त्रिणः, पञ्च-स्वतन्त्रप्रभार-राज्यमन्त्रिणः, षट्-त्रिंशत्- राज्य-मंत्रिणः च शपथवचनं स्वीकृतवन्तः ।

## जयशंकर:

केंद्रीयमंत्री डॉ. एस्-जयशंकरः अद्य दिल्ल्यां मॉरीशस्-देशस्य प्रधानमंत्रिणा प्रविंद-जुगनाथ इत्यनेन सह मेलनम् अकरोत् । एकस्मिन् सामाजिकसञ्चारपटले, डॉ. जयशंकरः अवदत् यत् तयोः सम्वादः भारत-मॉरीशस्-देशयोः विशेषसम्बन्धान् प्रकटयति ।अमुना नेपालस्य प्रधानमन्त्रिणा पुष्प-कमल-दहालेन सह अपि मेलनं विधाय विविध-विषयेषु चर्चा कृता सममेव डॉ जयशङ्करः मालदीवस्य राष्ट्रपतिना डॉ. मोहम्मद-मुइज्जू इत्यमुना सह अपि मेलनम् अकरोत् । सः अकथयत् यत् भारतं मालदीवेन सह सम्मिल्य कार्यं कर्तुम् उत्सुकः वर्तते । सः बांग्लादेशस्य प्रधानमंत्री शेखहसीना, श्रीलंकायाः राष्ट्रपतिः रानिल-विक्रमसिंघे, भूटानस्य प्रधानमंत्री शेरिंग-टोबगे, सेशेल्स-देशस्य उपराष्ट्रपतिः अहमद-अफीफः इत्येतैः सह अपि मेलनम् अकरोत् ।

## मणिपुरस्य जिरीबाम

मणिपुरस्य जिरीबाम-क्षेत्रे मुख्यमन्त्रिणः एन. बीरेन सिंहस्य अग्रिम-सुरक्षा-दलोपरि अज्ञात-शस्त्रधारिभिः आक्रमणकारिभिः योजनापूर्वकम् आक्रमणं विहितम्। एतत् आक्रमणं सप्तत्रिंशत् सङ्ख्याक-राष्ट्रियराजमार्गस्य **कोटलेन-सिनम-ग्रामं** निकषा सञ्जातम्। यद्यपि मुख्यमन्त्री अस्मिन् दले न अवर्तत। आरक्षिणां प्रतिवेदने प्रोक्तं यत् अस्मिन् आक्रमणे एकः आरक्षि-कर्मि व्रणितो जातः। सः चिकित्सालये उपचर्यमाणो वर्तते। घटना-स्थले अतिरिक्तं सुरक्षा-बलं सन्नद्धं वर्तते। आक्रमण-कारिणां निगडनाय अन्वीक्षणाभियानं प्रारब्धमस्ति

## उपराज्यपालः-दिल्लीजलसङ्कटः

दिल्ल्याः उप-राज्यपालः विनय-कुमार-सक्सेना दिल्ली प्रशासनम् आश्वासयत् यत् असौ हरियाणा प्रशासनेन सह राजधान्यां दिल्ल्यां यमुना-नद्याः जल-प्रदानाय वार्तां करिष्यति। अद्य उप-राज्यपालेन सह उपवेशनस्य अनन्तरं दिल्ली-प्रशासनस्य मन्त्री आतिशी अवोचत् यत् दिल्ल्याम् इदानीं यावत् हिमाचल-प्रदेशात् अपि जलं न प्राप्यते।

## बेंगलुरु-प्रज्वलरेवन्ना

बेंगलुरु-नगरस्य एकेन न्यायायेन अद्य यौनोत्पीड़न-प्रकरणमधिकृत्य जेडीएस् इति जनता-दलस्य निलम्बित-नेता प्रज्वलरेवन्ना जूनस्य चतुर्विंशति-दिनाङ्कं यावत् न्यायिक-निगडने प्रेषितः। प्रकरणस्य अन्वीक्षणं कुर्वता विशिष्टान्वीक्षणदलेन निगडनकालं वर्धितुं न याचितं, यस्यानन्तरम् न्यायाधीशेन आदेशः प्रख्यापितः । ध्यानास्पदं वर्तते यत् प्रज्वलः मईमासस्य त्रिंशत्-दिनाङ्के बेंगलुरु-विमानस्थात्रम् इत्यत्र निगडितः आसीत् ।

## इजरायल-त्यागपत्रम्

इजरायल-देशस्य युद्ध-मन्त्रिमण्डलस्य सदस्यत्र बेनी गैंट्ज इत्यसौ ह्यः स्वपदात् त्यागपत्रम् अयच्छत् । त्रि-सदस्यीय-युद्ध-मन्त्रिमण्डलस्य घटनं गतवर्षे ऑक्टूबर-मासे इजरायल-देशे हमासस्य आक्रमणानन्तरं कृतमासीत्। श्री गैंट्ज इत्यसौ अवोचत् यत् प्रधानमन्त्रिणा नेतन्याहू इत्यमुना युद्धस्य अनन्तरं गजा इत्यस्मै कापि रणनीतिः नैव निर्मिता चेत् सः जूनमासस्य अष्टम-दिने प्रशासनात् बहिः निर्गच्छति ।

## ऋतुविज्ञानविभागः

ऋतुविज्ञानविभागेन अद्य गोवा,महाराष्ट्र-कर्णाटक-राज्येषु तीव्रातितीव्र-वृष्टेः अनुमानं व्यक्तीकृतम् सहैव तेन कर्णाटक-लक्ष्द्वीप-केरला-आन्ध्रप्रदेश-राज्येषु अपि अल्पवृष्ट्या सह तीव्रझांझावातस्य अनुमानं व्यक्तीकृतम् । बिहार-झारखंड- ओडिशा-मध्य-प्रदेश-छत्तीसगढ़-राज्येषु आगामि-चतुर्षु दिवसेषु समानैव स्थितिः भवितुं सम्भाव्यते अपरत्र, जूनस्य त्रयोदशदिनाङ्कं यावत् पंजाब-हरियाणा-बिहार- झारखंड-पश्चिम-बंगाल-हिमाचल-प्रदेश-उत्तराखंड-दिल्ली-राजस्थान-मध्यप्रदेश राज्याणां केषुचित् भागेषु भीषण-तापस्य स्थितिः भविष्यति । उत्तर-पश्चिम,मध्य-भारतयोः आगामि-चतुर्षु दिवसेषु अधिकतम-तापमानं सम्वर्ध्य द्वि-डिग्री-सेल्सियस्-मितत: त्रि-डिग्री-सेल्सियस्-यावत् भवितुं शक्नोति ।

।। इति वार्ता: ।।